शिक्षा-निदेशालयः, राष्ट्रीयं राजधानीक्षेत्रम्, दिल्ली-सर्वकारः
अभ्यास-प्रश्नपत्रम्
कक्षा–एकादशी, संस्कृतम् (केन्द्रिकम् **322)**
सत्रम्– **2026-27**

समयः – होरात्रयम् सम्पूर्णाङ्काः – **80**

**अस्य प्रश्नपत्रस्य भागचतुष्टयम् अस्ति -**

| | | |
|---|---|---|
| **'क' भागः अपठित-अवबोधनम्** | **-** | **10 अङ्काः** |
| **'ख' भाग: रचनात्मक-कार्यम्** | **-** | **15 अङ्काः** |
| **'ग' भागः अनुप्रयुक्त - व्याकरणम्** | **-** | **20 अङ्काः** |
| **'घ' भागः** | **-** | **35अङ्काः** |

**(i) पठितावबोधनम्(25 अङ्काः)**

**(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः (10 अङ्काः)**

**सामान्यनिर्देशाः –**

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## 'क' भागः –अपठित-अवबोधनम्

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>एकस्मिन् वृक्षे हंसकाकौ निवासं कृतवन्तौ । हंसकाकौ मित्रे आस्ताम् । काकः हंसस्य सौन्दर्येण अत्यधिकम् असूयालुः आसीत् । हंसः परोपकारी दयालुः शान्तः धर्मिष्ठः सदा प्रसन्नः नीतिमान् च आसीत्। एकदा ग्रीष्मे परिश्रान्तः कश्चन पथिकः धनुर्बाणं समीपे निधाय प्रसुप्तः । क्षणान्तरे तस्य मुखात् वृक्षच्छाया अपगता । पथिकस्य मुखम् आतपेन तप्तम् अवलोक्य वृक्षस्थितेन हंसेन पक्षौ प्रसारितौ । लब्धनिद्रासुखेन पथिकेन मुखम् उद्घाटितम् । सर्वं पश्यन् काकः वृक्षे अतिष्ठत् । परसुखम् असहिष्णुः काकः तस्य मुखे पूरीषोत्सर्गं कृत्वा पलायितः । पथिकेन उपरि निरीक्षितम् । सः हंसम् अपश्यत् । पूरीषोत्सर्गं हंसः एव कृतवान् इति मत्वा पथिकः बाणेन धर्मिष्ठं हंसम् अमारयत् । सत्यम् एव उक्तम् - त्यज दुर्जनसंसर्गम् ' इति । | 10 |
| | **(अ) एकपदेन उत्तरत - केवलं प्रश्नद्वयम्**<br>i) किं त्यज ?<br>ii) क: असूयालुः आसीत् ?<br>iii) पथिकः समीपे किं निधाय प्रसुप्तः ? | 1×2=2 |
| | **(आ) पूर्णवाक्येन उत्तरत -केवलं प्रश्नद्वयम्**<br>i) हंसः कीदृशः आसीत् ?<br>ii) परसुखम् असहिष्णुः काकः किं कृत्वा पलायितः ?<br>(iii) किम् अवलोक्य वृक्षस्थितेन हंसेन पक्षौ प्रसारितौ ? | 2×2=4 |
| | **(इ) अनुच्छेदस्य (द्वित्रिशब्दात्मकं) समुचितं शीर्षकं लिखत।** | 1×1=1 |
| | **(ई) यथानिर्देशम् उत्तरत- केवलं प्रश्नत्रयम्**<br>(i) "वसतिम्"इत्यर्थे किं पदं गद्यांशे प्रयुक्तम्?<br>(क) धनुर्बाणं (ख) उद्घाटितम्<br>(ग) सौन्दर्येण (घ) निवासं | 1×3=3 |

| | | |
|---|---|---|
| | (ii)“काकः हंसस्य सौन्दर्येण अतीव असूयालुः आसीत् । इत्यत्र ‘आसीत्’ इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?<br>(क) हंसस्य (ख) असूयालुः<br>(ग) काकः (घ) सौन्दर्येण<br>(iii) “लब्धनिद्रासुखेन”इत्यस्य विशेषणपदस्य किं विशेष्यमत्र प्रयुक्तम्?<br>(क) पथिकेन (ख)हंसेन<br>(ग) मुखम् (घ) उद्घाटितम्<br>(iv) “**निर्दयी**” इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?<br>(क) परोपकारी (ख) दयालुः<br>(ग)शान्तः (घ) धर्मिष्ठः | |
| | **‘ख’ भागः -- रचनात्मककार्यम्** | |
| **2.** | भवान् सुरेन्द्र:। जन्मदिवसोत्सवे कालघटिकां वाञ्छति। पितरं प्रति लिखितं पत्रं मञ्जूषात: पदानि स्वीकृत्य पुन: लिखत।<br>**(i)................**<br>दिनाङ्क: .......<br>परमादरणीया: पितृमहाभागा:<br>सादरं प्रणमामि।<br>**(ii)............**कुशलं तत्रास्तु। भवता स्वपत्रे पृष्टं यत् जन्मदिवसस्य**(iii)............**अहं किं वाञ्छामि? अहं तु **(iv)** ......... कालघटिकाम् इच्छामि। छात्रावासे सर्वाणि कार्याणि **(v)** --------- भवन्ति परं निश्चितसमयात् भोजनव्यवस्था न वर्तते। प्रात: **(vi)** ............... जागरणम् अत्यावश्यकम्। अत: नियमपालनाय**(vii)** ......... अत्यावश्यकी। अनया**(viii)**......अपि दैनिककार्येषु नियमित: भविष्यामि । शेषं सर्वं कुशलम्।मम जनन्यै अग्रजाय च **(ix)** ..........।<br>भवदीय: प्रियपुत्र: | **½×10=5** |

(x) ..........

**मञ्जूषा**

| |
|---|
| यथासमयं, सुरेन्द्रः, घटिका, अत्र, छात्रावासतः, अन्येषु, प्रणामाः, एकां, उपहाररूपेण, पञ्चवादने । |

3. अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशति-त्रिंशत् शब्दैः अनुच्छेदमेकं लिखत। सहायतार्थं मञ्जूषायां पदानि प्रदत्तानि सन्ति। **5**



**मञ्जूषा**

| |
|---|
| बालाः , गृहम् , आम्राणि , सोपानम्, जीर्णं शीर्णम्, गवाक्षः, आम्रवृक्षः, अस्ति, बालः, भित्तिका, आरोहति, पश्यन्ति |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां साहाय्येन 'पर्यावरण-संरक्षणम्' इति विषयमधिकृत्य एकम् अनुच्छेदं लिखत।**

| | | |
|---|---|---|
| | विषय: - पर्यावरण-संरक्षणम्<br>**मञ्जूषा**<br>(जीवनस्य आधारः, प्रदूषितम्, गम्भीरा समस्या, सन्तुलनम्, वृक्षाणाम् आरोपणम्, शुद्धवायुः, जलप्रदूषणम्, वनानां संरक्षणं, वसुन्धरा, जागरूकता, उत्तरदायित्वम्, 'वृक्षो रक्षति रक्षितः' । ) | |
| **4.** | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**<br>एकदा एक: (i)............नगररक्षक: आसीत्। इतस्तत: भ्रमन् स: एकम् अशीतिवर्षीयं (ii)..................... अपश्यत्। स: आम्रवृक्षस्य (iii).....................लग्न: आसीत्। इदं दृष्ट्वा नगररक्षक: तं महापुरुषम् अवदत्-अवलोकनेन प्रतीयते यत् यदा एष:(iv) ................फलिष्यति तदा तु भवान् जीवित: न भविष्यति। अत: किमर्थं वृथा (v)............. करोति भवान्? महापुरुष: हसित्वा अवदत्- पश्यन्तु एतान् (vi)..................... वृक्षान् । एतेषाम् आरोपणं मया न कृतं परं फलानि अहं (vii).....................संतुष्ट: भवामि। अत: यदा मया आरोपितस्य वृक्षस्य फलानि अन्ये (viii)....................., अहं पुन: प्रसन्नः भविष्यामि। महापुरुषस्य(ix)................ श्रुत्वा तं च नमस्कृत्य नगररक्षक: उक्तवान् - सज्जनता(x)................. खलु। स: प्रसन्न: भूत्वा तत: प्रस्थित:।<br>**मञ्जूषा-**<br>अनुकरणीया, खादित्वा, वचनं, फलयुक्तान्, कर्तव्यनिष्ठः, वृक्षः, खादिष्यन्ति, महापुरुषम्, आरोपणे, परिश्रमं<br>**अथवा** | ½×10= 5 |
| | | |

| | | |
|---|---|---|
| | **अधोलिखितसंवादे मञ्जूषासहायतया रिक्तस्थानानि पूरयत।**<br><br>गीता- राधिके! मया सह आपणं चलति किम्?<br>राधिका- 1 - .............................................।<br>गीता–परीक्षासमय: नातिदूरम् अत: कतिचन अभ्यासपुस्तिका: अपेक्षन्ते।<br>राधिका –2- .............................................।<br>गीता –शोभनम्! तदा तु भवती अपि मया सह एव अभ्यासपुस्तिका: आनयतु।<br>राधिका- 3- .............................................।<br>गीता–अस्तु! भवत्या: मातुल: अद्य कस्मिन् समये आगमिष्यति?<br>राधिका- 4- .............................................।<br>गीता – तदा तु समस्या एव नास्ति यतो हि आवां सायंकालात् पूर्वमेव आगमिष्याव:।<br>राधिका - 5 .............................................।<br>(उभे गच्छत:)<br><br>**मञ्जूषा**<br>**अभ्यासपुस्तिका: तु मया अपि आनेतव्या:।**<br>**मम मातुल: सायंकाले आगमिष्यति।**<br>**किम् आनेतव्यम् अस्ति आपणात्?**<br>**आगच्छतु तदा शीघ्रमेव चलाव:।**<br>**परमद्य गृहे मे मातुल: आगमिष्यति।** | **1×5=5** |
| | | |

# ‘ग’ भागः –अनुप्रयुक्तं व्याकरणम्

| | | |
|---|---|---|
| 5. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नत्रयम्)**<br>**I.** **कृतास्ते** तात मन्त्रिण:।<br>II. कुत्र वा **ममाम्बा**?<br>III. धनानि जीवितं **च+एव** परार्थे प्राज्ञ उत्सृजेत् ।<br>IV. **आसीत्+च** मे मनसि । | 1×3=3 |
| 6. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नत्रयम्)**<br>(i) कथञ्चित् **अभि+वि+ज्ञा+ल्यप्** विवर्णवदनं कृशम्।<br>(क) अभिविज्ञाय (ख)अभिज्ञाय<br>(ग) अभिविज्ञायप (घ) अभिविज्ञालयप<br>(ii) अपगतासूंश्च **कृत्वा** क्षितावपातयत्।<br>(क) कृ + त्वा (ख)कृ+क्त्वा<br>(ग) कृ+वा (घ) कृ+कृत्वा<br>(iii) तातस्तु तद् **अवलोक्य**।<br>(क) अव+लोक्+य (ख) अव+लोक् + यत्<br>(ग) अव+लोक् +तव्यत् (घ) अव+लोक्+ ल्यप्<br>(iv) कर्णं **दा+क्त्वा**।<br>(क)दात्वा (ख) दत्त्वा<br>(ग) दाक्त्वा (घ) दातवा | 1×3=3 |

| | | |
|---|---|---|
| | | |
| 7. | **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितशब्दं चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)**<br>(i)अङ्के ------------आरोप्य रामः सादरं पर्यपृच्छत्।<br>(क) भरतात्   (ख) भरतम्<br>(ग) भरतस्य   (घ) भरताय<br>(ii) ममैव जायमानस्य -------------- मे जननी मृता।<br>(क) प्रसववेदना   (ख) प्रसववेदनां<br>(ग)प्रसववेदनायै   (घ)प्रसववेदनया<br>(iii) कुसुमस्तबकस्येव द्वयी ---------मनस्विनः ।<br>(क) वृत्तिः   (ख) वृत्ते<br>(ग) वृत्तौ   (घ) वृत्तिं<br>(iv) अपत्यनिर्विशेषाणि ------विप्रकरोषि।<br>(क) सत्त्वं   (ख) सत्त्वानि<br>(ग) सत्त्वाय   (घ)सत्त्वस्य | 1×3=3 |

| | | |
|---|---|---|
| 8. | **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितक्रियापदं चित्वा रिक्तस्थानानि पूरयत।   (केवलं प्रश्नत्रयम्)**<br><br>(i)राजद्वारे श्मशाने च य: -----------स: बान्धव:।<br><br>(क) तिष्ठति (ख) तिष्ठत:<br><br>(ग) तिष्ठसि (घ) तिष्ठामि<br><br>(ii)राम: भरतं ---------।<br><br>(क) पर्यपृच्छन् (ख) पर्यपृच्छत्<br><br>(ग) पर्यपृच्छताम् (घ) पर्यपृच्छम्<br><br>(iii) स: अभिषेकावसाने मां गृहीत्वा तपोवनम्---------।<br><br>(क) आगच्छ: (ख) अगच्छन्<br><br>(ग) अगच्छम् (घ) अगच्छत्<br><br>(iv) बाल: हस्तं --------- ।<br>(क) प्रसारयसि (ख) प्रसारयामि<br><br>(ग) प्रसारयति (घ)प्रसारयन्ति | **1×3=3** |

| | | | |
|---|---|---|---|
| | 9. | **समुचितं उपपदविभक्तिरूपं चिनुत- (केवलं प्रश्नत्रयम्)**<br><br>I. ---------सह तेनैव पथा उपागमत्।(मुनिकुमार)<br>II. विनाशे ----------- सति त्याग: वरं भवति । (नियत)<br>III. शुष्कपत्रस्य---------- उपरि पतितमपश्यम्। (राशि)<br>IV. बालेऽस्मिन् औरस इव ----------- स्निह्यति मे मन: । (पुत्र) | 1x3=3 |
| | 10. | **अधोलिखितवाक्येषु वाच्यानुसारं रिक्तस्थानानि पूरयत- (केवलं प्रश्नद्वयम् )**<br>(i) भृत्या: ते -------- ।<br>(क)योजित: (ख) योजिता:<br>(ग) योजितानि (घ) योजितम्<br><br>(ii)----------- कर्म क्षिप्रम् आरभसे ।<br>(क) अहम् (ख) त्वया<br>(ग) त्वं (घ) मया<br><br>(iii) त्वं --------- ।<br>(क) गच्छतु (ख) गमनीयम्<br>(ग) गन्तव्यम् (घ) गच्छ | **1 x2 = 2** |
| | 11. | **रेखांकितस्य अशुद्धपदस्य स्थाने प्रदत्तविकल्पेभ्यः शुद्धं पदं चित्वा लिखत (केवलं प्रश्नत्रयम्)**<br>(i)तस्य पश्चिमे <u>**तीरं**</u> महाजीर्ण: शाल्मलीवृक्ष:।<br>(क) तीरस्य (ख) तीरे<br>(ग) तीरेण (घ) तीराय | **1x3-3** |

(ii) रोचते मे एष: **<u>मयूराय</u>** ।

(क) मयूरेण (ख) मयूर:

(ग) मयूरात् (घ) मयूरस्य

12. (iii) अहं ते क्रीडनकं **<u>दास्यति</u>** । 5

(क) दास्यसि (ख) दास्यन्ति

(ग) दास्यामि (घ) दास्याम:

(iv) तात: स्नेहपरवश: मद्रक्षणे **<u>आकुलाय</u>** अभवत् ।

(क) आकुल: (ख) आकुलम्

(ग) आकुला (घ) आकुलस्य

## खण्डः – घ (भाग – I)

½×2=1

## पठितांशावबोधनम् 25 अङ्काः

**अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**

आसीच्च मे मनसि 'अहो मोहप्रायमेतेषां जीवितम्'। आहारो मधुमांसादि:, श्रमो मृगया, शास्त्रं शिवारुतं, प्रज्ञा शकुनिज्ञानम्। यस्मिन्नेव कानने निवसन्ति तदेवोत्खातमूलमशेषत: कुर्वन्ति। इति चिन्तयन्त्येव मयि शबरसेनापति: स आगत्य तस्यैव तरोरधश्छायायां परिजनोपनीतपल्लवासने समुपाविशत्। आपीतसलिलो भुक्तमृणालिकश्चोत्थायापगतश्रम: सकलेन सैन्येन सहाभिमतं दिशमयासीत्। 1×2=2

1×2=2

**(अ) एकपदेन उत्तरत(केवलप्रश्नद्वयम्) -**

(क) शबराणां जीवितं कीदृशम् आसीत्?

(ख) शबराणां शास्त्रं किम्?

(ग) अपगतश्रम: शबरसेनापति: केन सहाभिमतं दिशमयासीत् ?

**(आ) पूर्णवाक्येन उत्तरत (केवलप्रश्नद्वयम्) -**

| | | | |
|---|---|---|---|
| | | (क)शबरजना: किं कुर्वन्ति?<br>(ख) सेनापति: कुत्र समुपाविशत्?<br>(ग) कीदृश: सेनापति: सैन्येन सह अभिमतं दिशम् अयासीत् ?<br><br>**(इ) यथानिर्देशमुत्तरत (केवलप्रश्नद्वयम्)-**<br><br>(क) 'वृक्षस्य' इति पदस्य पर्यायपदं किं प्रयुक्तम्?<br>(ख) 'श्रान्त:' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?<br>(ग) 'आसीत् च मे मनसि'इत्यत्र क्रियापदं किम् ? | |
| | | | |
| | **13.** | **अधोलिखितं पद्यद्वयं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br><br>**काचः काञ्चनसंसर्गात् धत्ते मारकतीं द्युतिम् ।**<br>**तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ।।**<br>**यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवा:।**<br>**न च विद्यागम: कश्चिद् वासं तत्र न कारयेत्।।**<br><br>**एकपदेन उत्तरत(केवलप्रश्नद्वयम्)-**<br>(क) क: मारकतीं द्युतिं धत्ते ?<br>(ख) यत्र कस्या: आगम: न स्यात्?<br>(ग) यत्र सम्मान: न स्यात् तत्र किं न कारयेत् ?<br><br>**पूर्णवाक्येन उत्तरत(केवलप्रश्नद्वयम्)-**<br>(क) मूर्ख: कथं प्रवीणतां याति?<br>(ख) कस्मिन् देशे वासं न कारयेत्?<br>(ग) काच: कथं मारकतीं द्युतिं धत्ते? | **5**<br><br>**½×2=1**<br><br>**1×2=2**<br><br>**1×2=2** |

| | | | |
|---|---|---|---|
| | | **निर्देशानुसारम् उत्तरत (केवलप्रश्नद्वयम्)-**<br>(क) **'**वासं तत्र न कारयेत्**'** अत्र किं क्रियापदं प्रयुक्तम् **?**<br>(ख) **'**मूर्ख: प्रवीणतां याति**'** अत्रकर्मपदं किम्**?**<br>(ग) **'**यस्मिन् देशे**'** अनयो: विशेषणपदं किमस्ति**?** | |
| | **14.** | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>प्रथमा – वत्स! एनं बालमृगेन्द्रं मुञ्च, अपरं ते क्रीडनकं दास्यामि।<br>बाल: - कुत्र, देहि तत् (इति हस्तं प्रसारयति)<br>द्वितीया – सुव्रते! न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीये उटजे मृत्तिकामयूरस्तिष्ठति। तमस्योपहर।<br>बाल: - अनेनैव तावत् क्रीडिष्यामि। (इति तापसीं विलोक्य हसति)<br>तापसी – भवतु। न मामयं गणयति।(राजानमवलोक्य) भद्रमुख! मोचयानेन बाध्यमानं बालमृगेन्द्रम्।<br>दुष्यन्त: - आकारसदृशं चेष्टितमेवास्य कथयति।(आत्मगतम्)<br>अनेन कस्यापि कुलाङ्कुरेण<br>स्पृष्टस्य गात्रेषु सुखं ममैवम्।<br>कां निवृत्तिं चेतसि तस्य कुर्याद्<br>यस्यायमङ्कात् कृतिन: प्ररूढ: ।।<br>(बालमुपलालयन्) प्रकाशम्<br>दुष्यन्त: - अथ कोऽस्य व्यपदेश: ?<br>तापसी- पुरुवंश:<br><br>**(अ) एकपदेन उत्तरत (केवलप्रश्नद्वयम्)-**<br>(क) बालस्य वंश: क:?<br>(ख) तापसीं विलोक्य क: हसति?<br>(ग) ते अपरं किं दास्यामि ? | **5**<br><br>**½×2=1**<br><br>**1×2= 2**<br><br>**1×2=2** |

**(आ) पूर्णवाक्येन उत्तरत (केवलप्रश्नद्वयम्)-**

(क)एष: केन विरमयितुं न शक्य:?

(ख) उटजे किं तिष्ठति?

(ग) तापसी राजानमवलोक्य किं कथयति ?

**(इ) यथानिर्देशमुत्तरत (केवलप्रश्नद्वयम्)-**

(क) 'चेष्टितम्' इति पदस्य विशेषणपदं किम् ?

(ख) 'मनसि' इति पदस्य पर्यायपदम् अत्र किं प्रयुक्तम् ?

(ग) 'न मामयं गणयति'इत्यत्र क्रियापदं किम् ?

**15.** **अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –** **1×3=3**

**एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षण: ।**
**राजानं राजपुत्रं वा प्राप्येन्महतीं श्रियम्।**

**भावार्थ:-** एक: (**i**), **-----------** शूरवीर: कुशल: (**ii**). **............**एकाकी सन्नपि राजपरिवारं महतीं (**iii**) **...........**प्रापयेत् ।

**मञ्जूषा**

| |
|---|
| **लक्ष्मीं,बुद्धिमान्, मन्त्री** |

**अथवा** **1×3=3**

**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-**

**(क) कोऽप्रिय: प्रियवादिनाम्।**

(i) प्रियवादी जन: सर्वेषां शत्रु: भवति।

(ii) सदा अप्रियमेव वक्तव्यम् ।

(iii) ये जना: प्रियं वदन्ति तेषां कृते कोऽपि अप्रिय: (शत्रु:) न भवति ।

| | | | |
|---|---|---|---|
| | | **(ख) पण्डितो ह्यर्थकृच्छ्रेषु कुर्वन्ति नि:श्रेयसं महत्।**<br>(i) मूर्ख: समृद्धौ सहाय्यं करोति ।<br>(ii) विद्वान् अर्थकाठिन्येषु महत् कल्याणं कुर्वन्ति।<br>(iii) संबन्धिन: धनप्रप्त्यर्थं सहायतां कुर्वन्ति ।<br><br>**(ग) नास्ति जीवितादन्यदभिमतरमिह जगति सर्वजन्तूनाम्।**<br>(i) सर्वप्राणिनां कृते किमपि अभीष्टं नास्ति।<br>(ii) अस्मिन् संसारे सर्वेषां जन्तूनां कृते जीवितात् अन्यद् अभिमतं किमपि नास्ति।<br>(iii) सर्वे जना: जीवनं न वाञ्छन्ति। | |
| | | | |
| | 16. | **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत –**<br>**कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विन:**<br>**सर्वेषां मूर्ध्नि वा तिष्ठेत् विशीर्येत वनेऽथवा।।**<br><br>**अन्वय: -** मनस्विन: कुसुमस्तबकस्य इव (i)........वृत्ति:(भवति) सर्वेषां (ii).......... वा तिष्ठेत् अथवा (iii) ........विशीर्येत ।<br>**मूर्ध्नि,वने, द्वयी** | 1×3=3 |
| | | | |

<table>
<tr><td>17.</td><td>

**'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| 1 षड्दोषा: पुरुषेणेह | i दु:खाय परिवर्तते |
| 2 कच्चिच्चापरात्रेषु | ii षड् जीवलोकस्य सुखानि राजन् |
| 3 वश्यश्च पुत्रोऽर्थकरी च विद्या | iii हातव्या: भूतिमिच्छता |
| 4 पूर्वावधीरितं श्रेयो | iv चिन्तयस्यर्थनैपुणम् |

**अथवा**

**अधोलिखितवाक्येषु रेखाङ्कितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं चित्वालिखत –**
**(केवलं प्रश्नचतुष्टयम्)**

(i) ददर्श रामो दुर्दर्शं युगान्ते **भास्करं** यथा।

(ii) कच्चिदात्मसमा: **शूरा:** ।

(iii) **भक्तं**च वेतनं च यथोचितम्।

(iv) प्रिया च भार्या **प्रियवादिनी** च।

(v) परार्थे **प्राज्ञ** उत्सृजेत्।

(**मञ्जूषा**–मधुरभाषिणी,सूर्यं, बुद्धिमान्, भोजनं,वीरा:)

</td><td>1×4=4<br><br>1×4=4</td></tr>
<tr><td></td><td>ii – संस्कृतसाहित्येतिहासपरिचयः</td><td></td></tr>
<tr><td>18.</td><td>

**संस्कृतभाषाया: उद्भवं विकासं पाठाधारितं साहित्यं च अधिकृत्य प्रदत्तान् प्रश्नान् उत्तरत - (केवलं प्रश्नत्रयम्)**

(i) वीरः सर्वदमनः इति पाठः कस्मात् नाटकात् सङ्गृहीतः?

</td><td>1×3=3</td></tr>
</table>

| | | |
|---|---|---|
| | (ii) संस्कृतशब्दस्य व्युत्पत्ति: का?<br>(iii) 'देववाणी' कस्या: भाषाया: अपरनाम?<br>(iv) रामायणात् कः पाठः सङ्गृहीतः? | |
| **19.** | **वैदिकं साहित्यम् अधिकृत्य प्रदत्तवाक्येषु मञ्जूषाया: साहाय्येन रिक्तस्थानपूर्तिं कुरुत -**<br>(i) सङ्गीतसम्बद्ध: वेद: ------- अस्ति ।<br>(ii) छन्द:----------- तु वेदस्य ।<br>(iii) 'वेद'शब्दस्य अर्थ: --------वर्तते।<br>(iv) वेदा: ----------सन्ति।<br><br>**मञ्जूषा**<br>**ज्ञानं,सामवेद:, चत्वार:,पादौ** | **1×4=4** |
| **20.** | **रामायणं महाभारतं पुराणानि च अधिकृत्य 'क' भागं 'ख' भागेन सह मेलयत -**<br>**'क' भाग:**    **'ख' भाग:**<br>1 आदिकवि:    i महाभारतम्<br>2 पुराणं    ii वाल्मीकि:<br>3 वेदव्यास:    iii पञ्चलक्षणयुक्तं | **1×3=3** |

------------------ □□□□□□□□□□□□□------------------